मधूत्सवः, पुं, ( मधोश्चैत्रस्य उत्सवो यत्र । ) चैत्री पूर्णिमा । इति जटाधरः ॥ ( यथाभिज्ञानशकुन्तले । ६ ।
"कञ्चुकी । प्रविश्य । सक्रोधम् । मा तावदनात्मज्ञे ! देवेन प्रतिषिद्धेऽपि मधूत्सवे चूतकलिकाभङ्गमारभसे ॥")

मधूपघ्नं, क्ली, ( मधोस्तन्नाम्नो दैत्यस्य उपघ्नः आश्रयः । अभिधानात् क्लीवत्वम् । ) मथुरा । इति हेमचन्द्रः । ४ । ४४ ॥

मधूपघ्नः, पुं, ( मधोस्तन्नाम्नो दैत्यस्य उपघ्नः आश्रयः । ) मथुरा । इति जटाधरः ॥ (यथा, रघुवंशे । १५ । १५ ।
"स च प्राप मधूपघ्नं कुम्भीनस्याश्च कुक्षिजः ।
वनात् करमिवादाय सत्वराशिमुपस्थितः ॥")

मधूलः, पुं, ( मधु उरति प्राप्नोतीति । मधु + उर गतौ सौत्रधातुः + कः । रस्य लत्वम् । ) जलजगिरिजमधूकद्वयी । इति जटाधरः ॥ ( अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"गौरशाको मधूलोऽन्यो गिरिजः स्वल्पपत्रकः ॥" )

मधूलकः, पुं, ( मधूल + स्वार्थे कन् । ) जलजमधूकवृक्षः । तत्पर्य्यायः । दीर्घपत्रकः २ । इति जटाधरः ॥ गौरशाकः ३ मधूलः ४ स्वल्पपत्रकः ५ । इति रत्नमाला ॥
"स्यान्मधूके तु जलजे गिरिजेऽपि मधूलकः ॥"
इति शब्दरत्नावली ॥
( पर्य्यायान्तरमस्य यथा,—
"मधूको गुड़पुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
अस्य गुणाः । मधूकगुणतुल्याः । मधुररसः । इति हेमचन्द्रः ।६।२४॥ (क्लीवलिङ्गेऽपि दृश्यते । यथा, अथर्व्ववेदे । १ । ३४ । २ ।
"जिह्वाया अग्रे मधु मे जिह्वामूले मधूलकम् ॥")
तद्वति, त्रि ॥

मधूलिका, स्त्री, ( मधूल + कन् । स्त्रियां टाप् अत इत्वञ्च । ) मूर्व्वा । इत्यमरः । २।४ । ८४ ॥ ( अस्याः पर्य्यायो यथा,—
"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
यष्टीमधु । तत्पर्य्यायो यथा,—
"यष्टीमधु तथा यष्टी मधुकं क्लीतकन्तथा ।
अन्यत् क्लीतनकन्तत्तु भवेत्तोये मधूलिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधूली, स्त्री, ( मधूल + गौरादित्वात् ङीष् । ) क्लीतनकम् । मधुकर्कटी । आम्रः । इति राजनिर्घण्टः ॥

मध्यं, क्ली, (मन्यते इति । मन् + "अघ्न्यादयश्च ।" उणा० ४।१११। इति यक्प्रत्ययेन निपातितः ।) दशान्त्यसंख्या । शतसागरसंख्या । इति हेमचन्द्रः ॥ ( यथा, महाभारते । २ । ६१ । ४ ।
"मध्यञ्चैव परार्द्धञ्च सपरश्चात्र पण्यताम् ॥")
अवसानम् । तत्पर्य्यायः । विरामः २ । इति त्रिकाण्डशेषः ॥ मन्दत्वशीघ्रत्वोभयेतरत्वयुक्तनृत्यविषयकगमनविशेषः । इति भरतः ॥ लयविशेषः । इति मधुः ॥ मध्यमावृत्तिः । इति साङ्गः ॥ यथा, अमरे । २ । ६ । ७६ ।
"विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ॥"

मध्यः, पुं, क्ली, (मन् + यक् । नस्य च धः ।) देहमध्यभागः । माजा इति भाषा ॥ तत्पर्य्यायः । मध्यमम् २ अवलग्नम् ३ । इत्यमरः । २ । ६ । ७९ ॥ विलग्नम् ४ । इति मेदिनी । मे, ३४ ॥ ( यथा,भट्टिकाव्ये । ३ । १६ ।
"दधाना बलिभं मध्यं कर्णजाहविलोचना ॥"
मध्यभागमात्रम् । यथा, मनुः । ४ । ३७ ।
"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥"
"आयुष्कालस्य मध्यमावस्थाविशेषः कालः । षोड़शसप्तत्योरन्तरे मध्यं वयस्तस्य विकल्पो वृद्धिर्यौवनं सम्पूर्णता हानिरिति । तत्राविंशतेर्वृद्धिरात्रिंशतो यौवनमाचत्वारिंशतः सर्व्वधात्विन्द्रियबलवीर्य्यसम्पूर्णता । अत ऊर्द्धमीषत् परिहानिर्यावत् सप्ततिरिति ॥" इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥ )

मध्यः, पुं, ( मन् + यक् । नस्य धः । ) ग्रहस्फुटसाधकाङ्कविशेषः । स च अहर्गणजातदेशान्तरादिसंस्काररहिताङ्करूपग्रहः । इति ज्योतिषम् ॥

मध्यः, त्रि, ( मन्यते इति । मन् + यक् । नस्य च धः । ) न्याय्यः । अन्तरः । अधमः । इति शब्दरत्नावली ॥ मध्यमः । यथा,—
"उत्तमाधममध्यानि बुद्ध्वा कार्य्याणि पार्थिवः ।
उत्तमाधममध्येषु पुरुषेषु नियोजयेत् ॥"
इति मात्स्ये ८६ अध्यायः ॥

मध्यगन्धः, पुं, ( मध्ये फलाभ्यन्तरे गन्धोऽस्य । ) आम्रवृक्षः । इति शब्दचन्द्रिका ॥

मध्यतः, [ स् ] व्य, ( मध्य + तसिल् । ) मध्यात् । मध्ये । इति सिद्धान्तकौमुदी ॥ स्यादेः स्थाने तसादयो ये आदेशास्तेषामदन्तत्वमव्ययत्वमिति प्राञ्चः । तेन कुतः कुतः आगतं कौतस्कुतम् । इत्यनाव्ययत्वात् टिलोपः । इति दुर्गादासः ॥

मध्यदेशः, पुं, ( मध्यश्चासौ देशश्चेति । ) देशविशेषः । तत्पर्य्यायः । मध्यमः २ । इत्यमरः ॥ तस्य सीमा यथा, मनुः । २ । २१ ।
"हिमवद्विन्ध्ययोर्मध्यं यः प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः ॥"
विनशनं तीर्थभेदः । मां ध्यायति स्मरतीति केचित् मङ्गो दकारवानिति साङ्गे । मनो धश्चेति यप्रत्यये नस्य धे सति चतुर्थमात्रवानिति रूपरत्नाकरः । इति तट्टीकायां भरतः ॥

मध्यदेश्यः, त्रि, ( मध्यदेशे भवः इति यत् । ) मध्यदेशोद्भवः । यथा, वामनपुराणे १३ अः ॥
"शकाश्चैव संसरका मध्यदेश्या जनास्त्विमे ॥"

मध्यन्दिनः, पुं, ( दिनस्य मध्यं राजदन्तादित्वात् मध्यशब्दस्य पूर्व्वनिपातः । पृषोदरादित्वात् नकारागमः । मध्यन्दिनं पुष्पविकासकत्वेनास्यास्तीति । अच् । ) बन्धूकवृक्षः । इति राजनिर्घण्टः ॥ (मध्याह्ने, क्ली, यथा, मनुः ।४।१३१।
"मध्यन्दिनेऽर्द्धरात्रे च श्राद्धं भुक्त्वा च सामिषम् ॥" )

मध्यपञ्चमूलकं, क्ली, ( मध्यं मध्यमं पञ्चमूलकम् ।) पञ्चमूलपाचनविशेषः । यथा,—
"बला पुनर्नवैरण्डसूर्पपर्णीद्वयेन तु ।
एकत्र योजितैनैव स्यान्मध्यं पञ्चमूलकम् ॥"
इति राजनिर्घण्टः ॥

मध्यमं, पुं, क्ली, (मध्ये भवः । मध्य + "मध्यान्मः ।" ४ । ३ । ८ । इति मः । ) देहमध्यभागः । इत्यमरः । २ । ६ । ७९ ॥

मध्यमः, पुं, ( मध्ये भवः । मध्य + मः । ) सप्तस्वराणां मध्ये पञ्चमस्वरः । इत्यमरः ।१।७।१ ॥ गानशास्त्रमते चतुर्थस्वरः । स तु क्रौञ्चस्वरतुल्यः । अस्योच्चारणस्थानं वक्षः । व्याकरणमते अधरः । अयं विप्रवर्णः । अस्य संज्ञा अन्तरः । अर्थात्चतुःस्वरमिलितः । तस्य तानाश्चतुर्विंशतिः तेषां प्रत्येकं द्वात्रिंशद्भेदेन ७६८ताना भवन्ति । इति संगीतशास्त्रम् ॥ उपपतिभेदः । तस्य लक्षणम् । प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गृह्णाति स मध्यमः । यथा,—
"आस्यं यद्यपि हास्यवर्जितमिदं वास्येन हीनं वचो
नेत्रे शोणसरोजकान्तिरुचिरे क्वापि चर्य्यं स्थीयते ।
मालायाः करणोद्यमे मकरिकारम्भः कुचाम्भोजयो-
र्धूपः कुन्तलधोरणीषु सुतनोः सायन्तनो दृश्यते ॥"
इति रसमञ्जरी ॥
मध्यदेशः । इत्यमरः ॥ ग्रहाणां सामयिकसंज्ञाविशेषः । यथा,—
"द्युचरचक्रहृतो दिनसञ्चयः
क्ष ह हृतो भगणादिफलं ग्रहः ।
दशशिरःपुरमध्यमभास्करे
क्षितिजसन्निधिगे सति मध्यमः ॥"
इति सिद्धान्तशिरोमणिः ॥
मृगभेदः । रागभेदः । इति धरणिः ॥

मध्यमः, त्रि, ( मध्ये भवः । मध्य + "मध्यान्मः ।४। ३ । ८। इति मः । ) मध्यभवः । इति मेदिनी । मे, ४६ ॥ ( यथा, मनौ । ६ । ११२ ।
"ततोऽर्द्धं मध्यमस्य स्यात् तुरीयन्तु यवीयसः ॥")
तत्पर्य्यायः । माध्यमम् २ मध्यमीयम् ३ माध्यन्दिनम् ४ । इति हेमचन्द्रः ॥ (वयोमध्यसमयः ।
"वयश्चतुर्व्विधं प्रोक्तं मध्यमाधममुत्तमम् ।
हीनञ्च हारीत खल तानि वक्ष्यामि साम्प्रतम् ।